**CLASS : 10th (Secondary)** **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : A***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

***निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



www.mseducationtv.com

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – 4 × 2 = 8

भारतीया संस्कृति संस्कृतभाषाम् आश्रित्य तिष्ठति। भारतस्य आत्मा संस्कृत्या प्रकाशते। संस्कृतभाषायाः पुनरुज्जीवनं तदा भविष्यति यदा जनजीवनस्य प्रत्येके क्षेत्रे संस्कृतस्य प्रयोगः भवेत्। संस्कृतभाषा यदा भारतस्य व्यवहारभाषा आसीत् तदा भारतं 'विश्वगुरुः' इति ख्यातिम् अलभत। विदेशेभ्यः छात्राः अध्ययनार्थम् अत्र आगच्छन्ति स्म। नालन्दा-तक्षशिला-आदि विश्वविद्यालयेषु विविधानि शास्त्राणि तेभ्यः पाठ्यन्ते स्म। पुनः विश्वगुरुत्वं प्राप्तुं भारतेन संस्कृतस्य अवलम्बनं करणीयम् एव।

*प्रश्नाः*

(क) संस्कृतभाषायाः पुनरुज्जीवनं कदा भविष्यति ?

(ख) कस्य आत्मा संस्कृत्या प्रकाशते ?

(ग) छात्राः कुतः अध्ययनार्थं अत्र आगच्छन्ति स्म ?

(घ) केषु विश्व-विद्यालयेषु विविधानि शास्त्राणि पाठ्यन्ते स्म ?

**खण्डः 'ख'**

**(रचनात्मकं–कार्यम्)**

**2.** (क) भवान् विकासः। अमेरिका-वासतव्यं मित्रं मार्टिनं नैनीतालविषये लिखितं पत्रं मञ्जूषाप्रदत्तैः पदैः पूरयित्वा उत्तर-पुस्तिकायां लिखत – 4 × 1 = 4

परीक्षाभवनम्

तिथिः

प्रिय मित्र मार्टिन,



www.mseducationtv.com

नमोनमः।

गतमासे आवयोः (i) ........... वार्तालापः अभवत्। ह्यः एव अत्र (ii) ........... आरभत्। अनेके (iii) ........... तं द्रष्टुं दूरतः आगताः आसन्। अत्रत्यानि प्राकृतिकदृश्यानि आकर्षकानि (iv) ........... च सन्ति। अहम् इच्छामि ईदृशे अवसरे भवान् अपि भारते आगच्छेत्।

सस्नेहं,

भवतां मित्रम्

विकासः

**मञ्जूषा**

| यात्रिणः, दूरभाषेण, मनोरमाणि, हिमपातः। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – 4 × 1 = 4



***प्रश्नाः***

(i) अस्मिन् चित्रे एक आदर्शः ........... वर्णितः।



www.mseducationtv.com

(ii) ........... पुस्तकानि सन्ति।

(iii) प्रकोष्ठे मञ्चस्य ........... समाचार-पत्रम् अस्ति।

(iv) पुत्रः ........... चरणस्पर्शम् करोति।

**मञ्जूषा**

उपरि, पितुः, परिवारः, कापाटिकायाम्।

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्ट गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

रामः = एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि-क्षत्रियकुल-पितामहयोः सूर्यचन्द्रयोः को वा भवतोवंशस्य कर्त्ता ?

**अथवा**

निहन्यन्ते च विवशाः प्राणिनः। ज्वालामुद्गिरन्त एते पर्वता अपि भीषणं भूकम्पं जनयन्ति।

**4.** अधोनिर्दिष्ट श्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – $1 \times 4 = 4$

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।

**अथवा**

क्रोधो हि शत्रुः प्रथमो नराणां,

देहस्थितो देहविनाशनाय।



www.mseducationtv.com

यथास्थितः काष्ठगतो हि वह्निः,

स एव वह्निर्दहते शरीरम्।

**5.** अधस्तनसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – $2 \times 2 = 4$

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

(ख) अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः।

(ग) एक एव खगो मानी वने वसति चातकः।

(घ) कृतपरिकरः स्वेदोद्गारं प्रधावति धावति।

**6.** अधः प्रदत्तं गद्यांशं सम्पठ्य निर्दिष्ट-प्रश्नोत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

ज्वालामुखपर्वतानां विस्फोटैरपि भूकम्पो जायते इति कथयन्ति भूकम्पविशेषज्ञाः। पृथिव्याः गर्भे विद्यमानोऽग्निर्यदा खनिजमृत्तिकाशिलादि सञ्चयं क्वथयति तदा तत्सर्वमेव लावारसताम् उपेत्य दुर्वारगत्या धरां पर्वतं वा विदार्य बहिर्निष्क्रामति।

(क) केषां विस्फोटैः भूकम्पो जायते ?

(ख) अग्निः शिलादि सञ्चयं किं करोति ?

(ग) भूकम्पविशेषज्ञाः किं कथयन्ति ?

**7.** अधोनिर्दिष्टं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये –

$2 \times 1 = 2$

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च।।

(क) व्यायामिनं का न समधिरोहति ?



www.mseducationtv.com

(ख) स्थिरं किं भवति ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) प्राणेभ्यो अपि प्रियः सुहृत्।

(ख) चातकः वने वसति।

(ग) आर्यस्य प्रसादेन मे वणिज्या अखण्डिता।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग-2" स्वपाठ्य- पुस्तकात् ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

## खण्डः 'घ'
## (अनुप्रयुक्त–व्याकरणम्)

**10.** (क) दीर्घ-सन्धेः अथवा व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) तत्पुरुषसमासस्य अथवा द्वन्द्वसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य अथवा अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

$3 \times 1 = 3$

(क) ............. जीवनं दुर्वहम् अस्ति। (अत्र, बहिः)

(ख) पर्यावरणस्य संरक्षणम् ............. प्रकृतेः आराधना।

(यत्र, एव)

(ग) ............. हरीतिमा तत्र शुचि पर्यावरणम्। (यत्र, भृशम्)

**12.** प्रदत्तोपपदविभक्ति वाक्येषु उचित विभक्ति प्रयोगं कुरुत –



www.mseducationtv.com

4 × 1 = 4

(क) ............. परितः वृक्षाः सन्ति। (ग्रामस्य, ग्रामं)

(ख) बालः ............. बधिरः अस्ति। (कर्णेन, कर्णाभ्याम्)

(ग) रमेशः ............. स्पृहयति। (फलेन, फलेभ्यः)

(घ) ............. पत्राणि पतन्ति। (वृक्षात्, वृक्षस्य)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'बालक' शब्दस्य चतुर्थी-एकवचने।

(ख) 'लता' शब्दस्य तृतीया-एकवचने।

(ग) 'साधु' शब्दस्य पंचमी-एकवचने।

(घ) 'युष्मद्' शब्दस्य षष्ठी-बहुवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'भू' लट्लकार, प्र० पु०, द्विवचने।

(ख) 'पठ्' लृट्लकार, म० पु०, एकवचने।

(ग) 'गम्' लङ्लकार, उ० पु०, बहुवचने।

(घ) 'खाद्' लोट्लकार, प्र० पु०, एकवचने।



www.mseducationtv.com

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

3 × 1 = 3

(क) प्रभवति।

(ख) अधिगच्छति।

(ग) उपदिशति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु एकं शुद्धम् उत्तरं लिखत – 16 × 1 = 16

(क) 'कः + अत्र' अत्र किं सन्धियुक्तपदम् ?

(i) कात्र

(ii) कोऽत्र

(iii) कोत्र

(iv) कत्र

(ख) 'एकैकः' इति पदस्य कः सन्धिविच्छेदः ?

(i) एका + कः

(ii) एक + एकः



www.mseducationtv.com

(iii) एकम् + कः

(iv) एकै + कः

(ग) 'यथाशक्ति' इति पदस्य किं विग्रहम् ?

(i) शक्तिम् अनतिक्रम्य

(ii) यथा शक्तिं

(iii) शक्ति अनुरूपम्

(iv) शक्तिं यथा

(घ) 'पर्वतश्रेणी' इति पदे कः समासः ?

(i) कर्मधारयः

(ii) बहुव्रीहिः

(iii) तत्पुरुषः

(iv) द्वन्द्वः

(ङ) 'पण्डितः' इति पदस्य विलोमपदम् ?

(i) मूर्खः

(ii) धनिकः

(iii) देवः

(iv) कुक्कुरः



www.mseducationtv.com

(च) 'गुणः' इति पदस्य विलोमपदम् ?

(i) गुणाः

(ii) दोषाः

(iii) अदोषाः

(iv) दोषः

(छ) 'राजा' इति पदस्य पर्यायपदम् ?

(i) नृपः

(ii) नरपः

(iii) न्रिपः

(iv) निरपः

(ज) 'जलम्' इति पदस्य पर्यायपदम् ?

(i) रसालम्

(ii) तक्रम्

(iii) सलिलम्

(iv) पाषाणम्

(झ) 'ज्ञान + मतुप्' इति संयोगे किं रूपम् ?



www.mseducationtv.com

(i) ज्ञानमान्

(ii) ज्ञानमतुप्

(iii) ज्ञानवान्

(iv) ज्ञानमतु

(ञ) 'पशुत्वम्' इति पदे कः प्रत्ययः ?

(i) त्व

(ii) तल्

(iii) ल्यप्

(iv) ल्युट्

(ट) '20' इति अंके किं संख्यावाचीपदम् ?

(i) त्रिशंत्

(ii) विंशत्

(iii) विंशतिः

(iv) विंशतीः

(ठ) 'नवनवतिः' इति पदे का संख्या ?

(i) 9

(ii) 99



www.mseducationtv.com

(iii) 89

(iv) 69

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अतिदीर्घः

(ii) प्रवासः

(iii) अति

(iv) दीर्घः

(ढ) 'कुमारयोः कुशलवयोः' अत्र किं विशेषणम् ?

(i) कुश

(ii) लवयोः

(iii) कुशलवयोः

(iv) कुमारयोः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) अहं प्रातः ............ भ्रमणाय गच्छामि।






www.mseducationtv.com

(ii) ततः ............. विद्यालयं गच्छामि।






www.mseducationtv.com

**CLASS : 10th (Secondary)** **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : B***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

---

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

---

***निर्देश :***

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



www.mseducationtv.com

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा अधस्तानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – $4 \times 2 = 8$

यस्य वित्तं भवति तमेव जनं लोकाः कुलीनं मन्यन्ते, शास्त्रविदं स्वीकुर्वन्ति, गुणग्राहिणं स्थापयन्ति, वक्तारम् उद्घोषयन्ति, रूपवन्तं च आभणन्ति। धनप्रभावेण अपूज्यः पूज्यते, अगम्यो गम्यते, अवन्द्यो च वन्द्यते। धनस्यैव एषः प्रभावः यत् कुरूपोऽपि सुरूपो कथ्यते, निरक्षरोऽपि विद्वान् मन्यते, निष्कुलीनः च कुलीनः उद्घोष्यते।

*प्रश्नाः*

(क) लोकाः कं कुलीनं मन्यन्ते ?

(ख) कः धनप्रभावेण पूज्यते ?

(ग) कुरूपोऽपि कस्य प्रभावेण सुरूपः कथ्यते ?

(घ) अवन्द्यो कस्य प्रभावेण वन्द्यते ?

**खण्डः 'ख'**

**(रचनात्मकं–कार्यम्)**

**2.** (क) भवती सौम्या। विद्यालयतः शैक्षिक-भ्रमणाय भुवनेश्वरं गन्तुम् अनुमतिं धनराशिं च प्राप्तुम् स्वपितरं प्रति लिखितं पत्रं मञ्जूषाप्रदत्तैः पदैः पूरयित्वा उत्तर-पुस्तिकायां लिखत –

$4 \times 1 = 4$

परीक्षाभवनम्

तिथिः

माननीयाः पितृवर्याः,



www.mseducationtv.com

सादरं प्रणमामि।

मम (i) ........... परीक्षा समाप्ता। मम विद्यालयस्य अध्यापिकाः शैक्षिक (ii) ........... नेष्यन्ति। एतदर्थं पञ्चशतं (iii) ........... दातव्यानि। यदि भवतः (iv) ........... स्यात् तर्हि अहम् अपि गच्छेयम्। अतः कृपया उपर्युक्ता राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु। सर्वेभ्यः मम प्रणामाः निवेदनीयाः।

भवतां प्रिया

सौम्या

**मञ्जूषा**

रूप्यकाणि, प्रथमसत्रीया, अनुमतिः, भ्रमणाय।

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत — 4 × 1 = 4



*प्रश्नाः*

(i) ........... दिनम् अस्ति।



www.mseducationtv.com

(ii) जले ........... सञ्चाल्यन्ते।

(iii) एका बालिका आतपत्रं ...........।

(iv) ........... बालकाः कर्गदनौकाया मनोरंजनं कुर्वन्ति।

**मञ्जूषा**

| उपविष्टाः, कर्गदनौकाः, मेघाच्छन्नम्, धारयति। |
|---|

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्ट गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

1 × 4 = 4

इमान् भूषणमार्जनसमर्थान् तुषान् स्वर्णकारेभ्यो देहि। तेभ्यो लब्धाभिः काकिणीभिः काष्ठानि स्थालीं शरावद्वयं चाहर।

**अथवा**

गच्छ, गच्छ, जम्बुक। त्वमपि किञ्चित् गूढप्रदेशम्। यतो व्याघ्रमारीति वा शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

**4.** अधोनिर्दिष्ट श्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – 1 × 4 = 4

शरीरायासजननं कर्म व्यायामसंज्ञितम्।

तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।

**अथवा**

निमित्तमुद्दिश्य हि यः प्रकुप्यति,

ध्रुवं स तस्यापगमे प्रसीदति।



www.mseducationtv.com

अकारणद्वेषि मनस्तु यस्य वै,

कथं जनस्तं परितोषयिष्यति।।

**5.** अधस्तनसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – $2 \times 2 = 4$

(क) व्यायामं कुर्वतो जन्तोस्तद्बलार्धस्य लक्षणम्।

(ख) बुद्धिर्बलवती सदा।

(ग) हरिततरुणां ललितलतानां माला रमणीया।

(घ) नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।

**6.** अधः प्रदत्तं गद्यांशं पठित्वा निर्दिष्ट-प्रश्नोत्तराणि संस्कृतेन लिखत –

$3 \times 1 = 3$

ततस्तया वृद्धदासी साभिप्रायमालोकिता। तस्य हस्तात् प्रस्थमात्रं धान्यमादाय स्वगृहस्य चत्वरे तं प्रक्षालितपादम् उपावेशयत्। ततः तान् सुरभीन् शालीनातपे किञ्चिद् विशोष्य मुहुर्मुहुः परिवर्त्य समायां भूमौ अघट्टयत्। तुषेभ्यस्तण्डुलान्पृथक् कृत्वा धात्रीमुक्तवतीमातः! इमान् भूषणमार्जनसमर्थान् तुषान् स्वर्णकारेभ्यो देहि।

(क) साभिप्रायं का अवलोकिता ?

(ख) तुषाः कीदृशाः कथिताः ?

(ग) शालीन् किं कृत्वा कुमारी समायां भूमौ अघट्टयत् ?



www.mseducationtv.com

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये –

$2 \times 1 = 2$

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

अश्वचेत् धावने वीरः भारस्य वहने खरः।।

(क) अश्वः कस्मिन् वीरः भवति ?

(ख) भारस्य वहने कः वीरः भवति ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) आरोग्यं व्यायामात् उपजायते।

(ख) महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।

(ग) मुनिः स्वकार्यसंलग्न आसीत्।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग-2" स्वपाठ्य- पुस्तकात ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

## खण्डः 'घ'

## (अनुप्रयुक्त–व्याकरणम्)

**10.** (क) व्यंजनसन्धेः अथवा गुणसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) द्वन्द्वसमासस्य अथवा द्विगुसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –



www.mseducationtv.com

3 × 1 = 3

(क) यथा राजा ............. प्रजा। (तत्र, तथा)

(ख) यावत् दीयते ............. धनस्य सदुपयोगः वर्तते। (तावत्, तत्र)

(ग) कक्षात् ............. मा गच्छ। (अन्तः, बहिः)

**12.** प्रदत्तोपपदविभक्ति वाक्येषु उचित विभक्ति प्रयोगं कुरुत –

4 × 1 = 4

(क) ग्रामं ............. वृक्षाः सन्ति। (परितः, पुरतः)

(ख) ............. बलिः। (भूतस्य, भूतेभ्यः)

(ग) ............. बहिः एकः सरः अस्ति। (नगरेण, नगरात्)

(घ) जीवनं विभवं .............। (सह, विना)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'राम' शब्दस्य तृतीया एकवचने।

(ख) 'साधु' शब्दस्य पंचमी एकवचने।

(ग) 'मति' शब्दस्य सप्तमी एकवचने।

(घ) 'अस्मद्' शब्दस्य द्वितीया बहुवचने।



www.mseducationtv.com

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – $4 \times 1 = 4$

(क) 'नम्' लट्लकार, म० पु०, एकवचने।

(ख) 'कथ्' लोट्लकार, प्र० पु०, बहुवचने।

(ग) 'पत्' लृट्लकार, उ० पु०, द्विवचने।

(घ) 'कृ' लङ्लकार, प्र० पु०, एकवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

$3 \times 1 = 3$

(क) संस्करोति।

(ख) अनुसरति।

(ग) प्रतिवदति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत – $16 \times 1 = 16$

(क) 'गावः + च' अत्र किं सन्धियुक्तपदम् ?

(i) गाश्च

(ii) गावच



www.mseducationtv.com

(iii) गेश्च

(iv) गावश्च

(ख) 'यत्रास्ते' इति पदस्य कः सन्धिविच्छेदः ?

(i) यत्र + आस्ते

(ii) यत्रा + ते

(iii) यः + ते

(iv) यत्र + ते

(ग) 'उपनदी' इति पदस्य विग्रहम् ?

(i) नद्याः समीपम्

(ii) नद्यै समीपम्

(iii) नदीम् समीपम्

(iv) नद्याम् समीपम्

(घ) 'आत्मरक्षायै' इति पदे कः समासः ?

(i) द्विगु

(ii) तत्पुरुष

(iii) द्वन्द्वः



www.mseducationtv.com

(iv) बहुव्रीहिः

(ङ) 'अनादरः' इति पदस्य विलोमपदम् ?

(i) समादरः

(ii) आनदरः

(iii) आदरः

(iv) आनादारः

(च) 'दुर्लभः' इति पदस्य विलोमपदम् ?

(i) सुकरः

(ii) सुलभः

(iii) सुखदः

(iv) सुलभा

(छ) 'भार्या' इति पदस्य पर्यायपदम् ?

(i) माता

(ii) भारया

(iii) पत्नी

(iv) कन्या

(ज) 'नगरम्' इति पदस्य पर्यायपदम् ?



www.mseducationtv.com

(i) वनम्

(ii) उपवनम्

(iii) काननम्

(iv) पत्तनम्

(झ) 'मृ + क्त' इति संयोगे किं रूपम् ?

(i) म्रितः

(ii) मिरतः

(iii) मृतः

(iv) मृत्

(ञ) 'उपेत्य' इति पदे कः प्रत्ययः ?

(i) क्विप्

(ii) व्यत्

(iii) क्यप्

(iv) ल्यप्

(ट) 'त्रयोदशः' इति पदे का संख्या ?

(i) 13



www.mseducationtv.com

(ii) 23

(iii) 33

(iv) 43

(ठ) '20' इति पदे किं संख्यावाचीपदम् ?

(i) विंशतिः

(ii) चतुर्विंशति

(iii) विशतीः

(iv) त्रिंशत्

(ड) 'उदात्तरम्यः' समुदाचारः अत्र किं विशेष्यपदम् ?

(i) उदात्त

(ii) उदात्तरम्यः

(iii) रम्यः

(iv) समुदाचारः

(ढ) 'हृदयग्राही स्पर्शः' अनयोः पदयोः किं विशेषणम् ?

(i) स्पर्शः

(ii) हृदयग्राही

(iii) हृदय



www.mseducationtv.com

(iv) ग्राही

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) अहं सायं ............ पठनाय गच्छामि।




(ii) रमेशः ............. शयनाय गच्छति।






www.mseducationtv.com

**CLASS : 10th (Secondary)** | **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : C***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश :*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



www.mseducationtv.com

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – 4 × 2 = 8

अस्मिन् वैज्ञानिके युगे समाचारपत्रस्य महत्त्वपूर्णं स्थानं वर्तते। प्रातरेव प्रत्येकं जनं समाचारपत्रं द्रष्टुम् उत्सुकः जायते। सः ज्ञातुमिच्छति यत् अस्माकं देशे-विदेशे च काः मुख्य-घटनाः घटिताः। मनुष्यः सामाजिकः प्राणी अस्ति। स समाजस्य दशां घटनाक्रमं च ज्ञातुम् उत्सुकः भवति। समाचारपत्रम् अस्य जिज्ञासां पूरयति।

*प्रश्नाः*

(क) अस्मिन् युगे कस्य महत्त्वपूर्णं स्थानं विद्यते ?

(ख) समाचारपत्रेण मानवः किं ज्ञातुमिच्छति ?

(ग) मनुष्यः कीदृक् प्राणी अस्ति ?

(घ) मनुष्यस्य जिज्ञासां कः पूरयति ?

**खण्डः 'ख'**

**(रचनात्मकं–कार्यम्)**

**2.** (क) स्वमित्रं विद्यालयस्य वार्षिकोत्सव विषये लिखितं प्रदत्तपत्रं पठित्वा मञ्जूषातः पदानि चित्वा पूरयित्वा च उत्तर-पुस्तिकायां लिखत –

4 × 1 = 4

परीक्षाभवनम्

तिथिः

प्रिय मित्र रमेश !



www.mseducationtv.com

नमस्ते।

अत्र कुशलम् (i) ..........। अहं स्वविद्यालयस्य (ii) .......... वर्णयामि। उत्सवस्यावसरे अस्माकं विद्यालयः (iii) .......... भूषितः आसीत्। शिक्षानिदेशकः कार्यक्रमस्य (iv) .......... आसीत्। स कार्यक्रमं अतीव प्रांशसत।

गृहे सर्वेभ्यो मम प्रणामाः।

भवतः मित्रम्

क ख ग

**मञ्जूषा**

| मुख्यातिथिः, वार्षिकोत्सवम्, तत्रास्तु, वधूरिव। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत — $4 \times 1 = 4$



***प्रश्नाः***



www.mseducationtv.com

(i) अस्मिन् ……….. एकः द्रुमः अवशिष्टः।

(ii) ……….. द्रुमाः तु काष्ठकारैः छिन्नाः।

(iii) राजमार्गे धूमं ……….. एकं कारयानम् गच्छति।

(iv) वृक्षाणां संरक्षणेन एव पर्यावरणम् ………..।

**मञ्जूषा**

| क्षिपत्, चित्रे, रक्षणीयम्, अन्ये। |
|---|

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्टस्य गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

यां कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति – भद्रे ! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम् ? एवं कृते स हसितावधूतः गृहात् गृहं प्रविश्याभ्रमत्।

**अथवा**

विदूषकः – एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

**4.** अधोनिर्दिष्टस्य श्लोकस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।

**अथवा**



www.mseducationtv.com

निमित्तं उद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति।।

**5.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टनीयं – $2 \times 2 = 4$

(क) युष्मद्दर्शनात् कुशलमिव।

(ख) प्राणेभ्यो अपि प्रियः सुहृद्।

(ग) संपत्तौ च विपत्तौ च महतामेकरूपता।

(घ) जीवनं विभवं विना।

**6.** अधः प्रदत्तं गद्यांशं पठित्वा निर्दिष्टप्रश्नानाम् उत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

एकदा स कावेरीतीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्। तस्या अतुलितरूपसम्पदाभिभूतः शक्तिकुमारो अचिन्तयत् – सेयमाकृतिर्न शीलविरोधिनी आसज्जति मे हृदयमस्यामेव। तदेनां परीक्ष्योद्वहामि।

(क) विरलाभूषणा का आसीत् ?

(ख) शक्तिकुमारः कुमारीं कुत्र अपश्यत् ?

(ग) सा आकृति कीदृशी न आसीत् ?



www.mseducationtv.com

**7.** अधः प्रदत्तं श्लोकं पठित्वा प्रदत्तप्रश्नयोः संस्कृतेन उत्तरे लेखितव्ये –

$2 \times 1 = 2$

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

(क) कीदृशः महावृक्षः सेवितव्यः ?

(ख) का न निवार्यते ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) सा कन्या <u>अतिथिं</u> स्नानाय प्रेरितवती।

(ख) <u>प्रकृत्याः</u> सन्निधौ वास्तविकं सुखं विद्यते।

(ग) <u>शरीरस्य</u> आयासजननं कर्म व्यायामः इति कथ्यते।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग-2" स्वपाठ्य-पुस्तकात् ***एकं श्लोकं*** संस्कृतभाषायां लिखत। $1 \times 4 = 4$

## खण्डः 'घ'
## (अनुप्रयुक्त–व्याकरणम्)

**10.** (क) अयादिसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) द्विगुसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य अथवा अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$



www.mseducationtv.com

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

3 × 1 = 3

(क) कृपया ............. वदतु। (पुनः, कुत्र)

(ख) त्वं प्रातः ............. गच्छसि। (विद्यालयं, कुत्र)

(ग) ............. कुशली भवान् ? (मिथ्या, अपि)

**12.** प्रदत्तोपपदविभक्ति-वाक्येषु उचित विभक्ति प्रयोगं कुरुत –

4 × 1 = 4

(क) पिता ............. कुप्यति। (पुत्रं, पुत्राय)

(ख) पिता ............. सह गच्छति। (पुत्रात्, पुत्रेण)

(ग) ............. विना न जीवनम्। (धनस्य, धनं)

(घ) स ............. अन्धः। (नेत्राभ्याम्, नेत्रेण)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'बालक' शब्दस्य सप्तमी बहुवचने।

(ख) 'मुनि' शब्दस्य चतुर्थी एकवचने।

(ग) 'कन्या' शब्दस्य तृतीया बहुवचने।

(घ) 'तद्' शब्दस्य स्त्रीलिंग पंचमी द्विवचने।



www.mseducationtv.com

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत — $4 \times 1 = 4$

(क) 'भू' लृट्लकार, म० पु०, द्विवचने।

(ख) 'पठ्' लोट्लकार, उ० पु०, बहुवचने।

(ग) 'पा' (पिब्) लट्लकार, प्र० पु०, एकवचने।

(घ) 'गम्' विधिलिङ्, म० पु०, द्विवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत —

$3 \times 1 = 3$

(क) अवनयति।

(ख) अधिगच्छति।

(ग) प्रतिवसति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत — $16 \times 1 = 16$

(क) 'सु + आगतम्' अत्र किं सन्धियुक्तपदम् ?

(i) सुवागतम्

(ii) स्वागतम्



www.mseducationtv.com

(iii) सुआगतम्

(iv) सवागतम्

(ख) 'परीक्षितुम्' पदे कः सन्धिविच्छेदः ?

(i) परी + ईक्षितुम्

(ii) परी + क्षितुम्

(iii) परि + क्षितुम्

(iv) परि + ईक्षितुम्

(ग) 'अहर्निशम्' इति पदस्य किं विग्रहम् ?

(i) अहः च निशा च

(ii) अहनि निशा

(iii) अह निशम्

(iv) अहनि अहनि

(घ) 'दशाननः' इति पदे कः समासः ?

(i) द्विगु

(ii) बहुव्रीहिः

(iii) अव्ययीभाव



www.mseducationtv.com

(iv) तत्पुरुषः

(ङ) 'सुलभः' इति पदस्य विलोमशब्दः ?

(i) सुकरः

(ii) सुखदः

(iii) दुर्लभः

(iv) दुर्लभा

(च) 'सम्पत्तौ' इति पदस्य विलोमशब्दः ?

(i) विपत्तौ

(ii) विपदा

(iii) विपती

(iv) विपदी

(छ) 'शीघ्रम' इति पदस्य पर्यायपदम् ?

(i) यासि

(ii) गच्छसि

(iii) सत्वरम्

(iv) अवसि

(ज) 'पत्तनम्' इति पदस्य पर्यायपदम् ?



www.mseducationtv.com

(i) वनम्

(ii) नगरम्

(iii) उपवनम्

(iv) काननम्

(झ) 'समाज + ठक्' इति संयोगे किं रूपम् ?

(i) समाजी

(ii) समाजठक्

(iii) सामाजिक

(iv) सामाजिकः

(ञ) 'छदत्वम्' इति पदे कः प्रत्ययः ?

(i) त्व

(ii) क्त्वा

(iii) तव्यत्

(iv) अनीयर्

(ट) 'पंचविंशति' इति पदे का संख्या ?

(i) 35



www.mseducationtv.com

(ii) 45

(iii) 25

(iv) 55

(ठ) '49' इति अंके किं संख्यावाचीपदम् ?

(i) चतुर्दश

(ii) त्रयोदशः

(iii) चतुर्विंशति

(iv) नवचत्वारिंशत्

(ड) 'हृदयग्राही स्पर्शः' अत्र किं विशेष्यपदम् ?

(i) हृदय

(ii) ग्राही

(iii) हृदयग्राही

(iv) स्पर्शः

(ढ) 'कुमारयोः' कुशलवयोः अनयोः पदयोः किं विशेषणम् ?

(i) कुश

(ii) लवयोः

(iii) कुमारयोः



www.mseducationtv.com

(iv) कुशलवयोः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) रामः प्रातः ............ उत्तिष्ठति।




(ii) रमेशः ............. विद्यालयं गच्छति।






www.mseducationtv.com

**CLASS : 10th (Secondary)** **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : D***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश :*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*



www.mseducationtv.com

## खण्डः 'क'

## (अपठित–अवबोधनम्)

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत – 4 × 2 = 8

एकः काकः मुखे रोटिकाखण्डं गृहीत्वा वृक्षे उपविष्टः आसीत्। एकः शृगालः काकं दृष्ट्वा अवदत् – 'भो मित्र ! खगेषु भवान् मधुरगायकः। कृपया गायतुं इति।' रोटिकाखण्डं पादयोः अधः स्थापयित्वा काकः अवदत् – 'रे नाहं पूर्ववत् मूर्खः। लज्जितः शृगालः ततः पलायितः।'

*प्रश्नाः*

(क) काकः कुत्र उपविष्टः आसीत् ?

(ख) शृंगालः काकं दृष्ट्वा किं अवदत् ?

(ग) काकः रोटिकाखण्डं कुत्र अस्थापयत् ?

(घ) कः लज्जितः अभवत् ?

## खण्डः 'ख'

## (रचनात्मकं–कार्यम्)

**2.** (क) भवतः नाम अभिनवः। विद्यालयस्य प्रतियोगितासु भवता अनेकानि पदकानि जितानि। माधवं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तर-पुस्तिकायां लिखत – 4 × 1 = 4

परीक्षाभवनम्

तिथिः

प्रिय मित्र माधव,



www.mseducationtv.com

(i) .......... नमस्ते। अत्र कुशलम् (ii) .......... मया अनेकासु (iii) .......... भागः गृहीतः। 100 मी० धावन-प्रतियोगितायां मया (iv) .......... प्राप्तम्। 400 मी० धावन-प्रतियोगितायां च रजतपदकम्। पितृभ्यां मम प्रणामाः।

तव अभिन्नमित्रम।

अभिनवः

**मञ्जूषा**

| प्रतियोगितासु, सस्नेहं, स्वर्णपदकं, तत्रास्तु। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि च पठित्वा मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत – 4 × 1 = 4



***प्रश्नाः***

(i) इदं चित्रं .......... अस्ति।



www.mseducationtv.com

(ii) बालकः मित्रैः ........... क्रीडति।

(iii) एका कन्या ........... क्रीडति।

(iv) महिला ........... धारयति।

**मञ्जूषा**

सह, रज्ज्वा, शाटिकां, उद्यानस्य।

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोलिखित गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः – $1 \times 4 = 4$

स वस्त्रान्तपिनद्धशालिप्रस्थो दारग्रहणाय भुवमभ्रमत। यां कामपि लक्षणवती कन्यां विलोक्य स पृच्छति – भद्रे। शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम् ?

**अथवा**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।

**4.** अधोनिर्दिष्ट श्लोकस्य हिन्दीभाषायां सरलार्थः लेखितव्यः – $1 \times 4 = 4$

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।

पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।।

मानवाय जीवनं कामये नो जीवन्मरणम्।

शुचिपर्यावरणम्।।

**अथवा**



www.mseducationtv.com

व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।

स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।।

**5.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टयितव्यः – $2 \times 2 = 4$

(क) क्रोधो हि शुत्रः प्रथमो नराणाम्।

(ख) अत्यादरः शङ्कनीयः।

(ग) विचित्रा दैवगतिः।

(घ) यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहिदीनं वचः।

**6.** अधोलिखितं गद्यांशं पठित्वा निर्दिष्टप्रश्नानामुत्तराणि संस्कृतेन लेखितव्यानि – $3 \times 1 = 3$

कश्चन निर्धनो जनः भूरि परिश्रम्य किंचिद् वित्तम् उपार्जितवान्। तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्।

(क) जनः कीदृशः आसीत् ?

(ख) जनः किं कृत्वा वित्तम् उपार्जितवान् ?

(ग) तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत्।

**7.** अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नयोः उत्तरे संस्कृतेन लेखितव्ये –

$2 \times 1 = 2$

सक्तून् शोचति सम्प्लुतान् प्रतिकरोत्याक्रन्दतो बालकान्।

प्रत्युत सिंचति कर्परेण सलिलं शय्यातृणं रक्षति।।

दत्त्वा मूर्धनि शीर्णशूर्पशकलं जीर्णे गृहे व्याकुला।

किं तद् यन्न करोति दुःखगृहिणी देवे भृशं वर्षति।।



www.mseducationtv.com

(क) व्याकुला गृहिणी मूर्धनि किं दधाति ?

(ख) सलिलं केन सिंचति ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – $3 \times 1 = 3$

(क) <u>शिशुजनस्य</u> अद्य अशनं जातम्।

(ख) माता आक्रन्दतः <u>बालकान्</u> प्रतिकरोति।

(ग) चौरः <u>कर्पटम्</u> क्षिप्त्वा निर्गतः।

**9.** प्रश्नपत्रे लिखितं श्लोकं विहाय "शेमुषी भाग-2" स्वपाठ्य-पुस्तकात ***एकं*** श्लोकं संस्कृतभाषायां लिखत। $1 \times 4 = 4$

## खण्डः 'घ'

## (अनुप्रयुक्त–व्याकरणम्)

**10.** (क) वृद्धिसन्धेः अथवा व्यंजनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ख) द्विगुसमासस्य अथवा तत्पुरुषसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

(ग) करणकारकस्य अथवा सम्प्रदानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। $1 \times 2 = 2$

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

$3 \times 1 = 3$

(क) वयं ............. प्रसन्नाः भवेम। (सदा, कदा)

(ख) कोलाहलं ............. कुरुत। (सदा, मा)



www.mseducationtv.com

(ग) महाकविः कालिदासः ............ अभवत्। (पुरा, अद्य)

**12.** प्रदत्तोपपदविभक्ति-वाक्येषु उचित-विभक्ति-प्रयोगं कुरुत –

4 × 1 = 4

(क) धिक् ............ देशद्रोहिणम्। (तस्मै, तं)

(ख) ............ स्वस्ति। (नृपं, नृपाय)

(ग) ............ बहिः एकः सरः अस्ति। (नगरात्, नगरम्)

(घ) अध्यापकः ............ सह गच्छति। (छात्रं, छात्रेण)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – 4 × 1 = 4

(क) 'राम' शब्दस्य चतुर्थी एकवचने।

(ख) 'लता' शब्दस्य सप्तमी बहुवचने।

(ग) 'नदी' शब्दस्य द्वितीया द्विवचने।

(घ) 'किम्' शब्दस्य पंचमी बहुवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – 4 × 1 = 4

(क) 'गम्' लोट्लकार, म० पु०, एकवचने।



www.mseducationtv.com

(ख) 'खाद्' लङ्लकार, उ० पु०, बहुवचने।

(ग) 'पा' (पिब्) लृट्लकार, प्र० पु०, द्विवचने।

(घ) 'अस्' लट्लकार, उ० पु०, द्विवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत – $3 \times 1 = 3$

(क) विहसति।

(ख) सुगमः

(ग) उपस्थितः।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत – $16 \times 1 = 16$

(क) 'सु + आगतम्' अत्र किं सन्धियुक्तपदम् ?

(i) स्वागतम्

(ii) सवागतम्

(iii) सुआगतम्



www.mseducationtv.com

(iv) सूऽऽगतम्

(ख) 'कश्चित्' इति पदे कः सन्धिविच्छेदः ?

(i) का + चित्

(ii) कः + चित्

(iii) क + चित्

(iv) कश + चित्

(ग) 'राजपुरुषः' इति पदस्य विग्रहम् ?

(i) राज्ञः पुरुषः

(ii) राज्ञा पुरुषः

(iii) राज्ञ पुरुष

(iv) राज पुरुषः

(घ) 'अनुरथम्' इति पदे कः समासः ?

(i) द्वन्द्वः

(ii) बहुव्रीहिः

(iii) अव्ययीभावः

(iv) तत्पुरुषः



www.mseducationtv.com

(ङ) 'गुणः' इति पदस्य विलोमपदम् ?

(i) दोषाः

(ii) गुणाः

(iii) अदोषाः

(iv) दोषः

(च) 'आदरः' इति पदस्य विलोमपदम् ?

(i) समादरः

(ii) आनदरः

(iii) अनादरः

(iv) आनादरः

(छ) 'कन्या' इति पदस्य पर्यायपदम् ?

(i) बालकः

(ii) बालिका

(iii) प्रौढ़ा

(iv) बालः

(ज) 'नृपः' इति पदस्य पर्यायपदम् ?

(i) नरपः



www.mseducationtv.com

(ii) त्रिपः

(iii) निरपः

(iv) राजा

(झ) 'समाज + ठक्' इति संयोगे किं रूपम् ?

(i) सामाजिकः

(ii) समाजिकः

(iii) समाजी

(iv) समाजठक्

(ञ) 'दानीयः' इति पदे कः प्रत्ययः ?

(i) तव्यत्

(ii) क्त

(iii) अनीयर्

(iv) क्त्वा

(ट) 'त्रयस्त्रिंशत्' इति पदे का संख्या ?

(i) 33

(ii) 43



www.mseducationtv.com

(iii) 30

(iv) 63

(ठ) '60' इति अंके किं संख्यावाचीपदम् ?

(i) षट्

(ii) षड्विंशतिः

(iii) षष्टिः

(iv) षट्षष्टिः

(ड) 'अतिदीर्घः प्रवासः' अत्र किं विशेष्यपदम् ?

(i) अति

(ii) प्रवासः

(iii) दीर्घः

(iv) अतिदीर्घः

(ढ) 'उदात्तरम्यः समुदाचारः' अत्र किं विशेषणपदम् ?

(i) समुदाचारः

(ii) उदात्तरम्यः

(iii) उदात्त

(iv) रम्यः



www.mseducationtv.com

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) अभिनवः सायं ............ वादने उद्याने क्रीडति।




(ii) अहं प्रातः ............. व्यायामं करोमि।








www.mseducationtv.com